द्वादश ज्योतिर्लिंगानि

द्वादश ज्योतिर्लिंगानि

सौराष्ट्रे सोमनाथं च श्रीशैले मल्लिकार्जुनं |
उज्जयिन्यां महाकालमोंकाराममलेश्वरं || 1 ||

परल्यां वैद्यनाथं च डाकिन्यां भीमशंकरं |
सेतुबंधे तु रामेशं नागेशं दारुकावने || 2 ||

वाराणस्यां तु विश्वेशं त्र्यंबकं गौतमीतटे |
हिमालये तु केदारं घुष्मेशं च शिवालये || 3 ||

एतानि ज्योतिर्लिंगानि सायं प्रातः पठेन्नरः |
सप्तजन्मकृतं पापं स्मरणेन विनश्यति || 4 ||

एतेषां दर्शनादेव पातकं नैव तिष्ठति |
कर्मक्षयो भवेत्तस्य यस्य तुष्टो महेश्वराः || 5 ||

इति द्वादश ज्योतिर्लिंगानि |